M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref.
Ser. 855

Title: Godana Vidhi

855

855

गोदान विधिः

Godāna Vidhi		: Title
:	:	: Author
:	:	: Editor
:	:	: Year, Vols.
:	:	: Publisher
855 :	:	: Remarks

श्रीगणेशायनमः क्षेमप्रकाशे विष्णुधर्मोत्तरे पुण्यदिनेकृतोपवासः संप्राश्यपंच
गव्यंनरेश्वर घृतक्षीराभिषेकंचकृत्वाविष्णोःशिवस्यच समाभ्यर्च्ययथान्यायं
पुष्पादिभिरनुक्रमात् उदङ्मुखीप्राङ्मुखीचगांकृत्वाचपयस्विनीं वस्त्रालंकार
सहितांसितयज्ञोपवीतिनीं स्वर्णशृंगीरौप्यखुरीं सुवर्णोपरिसंस्थितां कांस्यपात्र
दोग्ध्रीं महाप्रभुक्तांताम्रपृष्ठीं नपृष्ठेच सितचामरपुष्पाद्यारक्तलांगूलभूषितां
श्वेतवस्त्रपरिछिन्नांघंटास्वनविनादितां पंचवस्त्रेण संबद्धां किंकिणीजाल
मंडितां दिव्यवस्त्रसमायुक्तां हेमदर्पणभूषितां पयस्विनीस्करीकांचनरूपीव
त्सकान्वितां ईदृशीं कपिलां दद्याछिवस्याग्रे विधानतः शय्यायाच दक्षिणां दद्या
त्स्वशक्त्याविधानतः ।। याज्ञवल्क्यः यथाकथंचिद्दत्वागां धेनुंवाधेनुमेववा अ
रोगांगामक्लिष्टांगीं दातास्वर्गेमहीयते गौरेकस्यैवदातव्या श्रोत्रियस्याविशेषतः सो
हितारयतेपूर्वान्सप्तसप्तसप्तच स्कंदपुराणे स्पृष्ट्वाश्चगावःशमयंतिपापं दत्तास्ता
वाचास्थिदिवंव्रजंति संपूज्यमानाश्चददातिवित्तं गोरोमतुल्यंधनमस्तिसर्वं स्क
रशिलां लक्षणवतीं युवतींगुणमंडितां बहुदुग्धवतीं स्निग्धांधेनुंदद्याद्विचक्षणः

गो॰दा॰ हारीतः बकुं कुष्मांडुगां यो वै ब्राह्मणायोपपादयेच्च उद्धरन्मे सप्त सप्त च सप्त सप्त कु
लानि च अकुलीनाय मूर्खाय मलुब्धाय पिशुनाय च हव्यकव्यविहीनाय गौर्न
देया कदाचन कपार्थे च तत्पालत्वान कीनाशे न नास्ति के गोजीवी वेचन
दातव्या गो — दुग्धसंमिभिः अथ गोदानविधिः ॥ ॥ देशकालौ संकीर्त्य गोरो
मसंख्यावर्षब्रह्मलोकेनिवाससौवर्णप्रासादरत्नोज्वलशय्यावराप्सरोन्वितलो
कप्राप्तिकामः स्वर्गप्राप्तिकामो विष्णुप्रीतिकामो वा सकलदुरितदौर्भाग्यदुः
स्वप्नदुर्निमित्तबाधाशांतिपूर्वकं श्र्यारोग्यधनधान्यसंततिप्राप्तिकामः श्रीपर
मेश्वरप्रीत्यर्थं ब्राह्मगोदानमहं करिष्ये तदंगं गणपतिपूजनपूर्वकं स्वस्तिपुण्याह
वाचनं आचार्यवरणं च करिष्ये ततो दाता प्रवरोच्चारणं कृत्वा ततो ब्राह्मणं अमु
कप्रवरान्वितामुकगोत्रोत्पन्नां अमुकशाखाध्यायिनं अमुकशर्माणं गोप्रति
ग्रहीतारं त्वां अहं वृणे वृतोस्मीत्युक्त्वा तत्पादोदकं तीर्थं पवित्रं पापनाशनं १
पाद्यं गृहाण विप्रेंद्र सर्वदेवमय नमोस्तु ते महाविष्णुस्वरूपिणे ब्राह्मणाय इदं
मि

पाद्यं ॥ ऋषिदेवाग्रजन्मासि त्वं विप्र पुरुषोत्तम अर्घ्यं चेह पुरुष अर्घ्योयं प्रति
गृह्यतां अर्घ्यं ॥ विष्णुरूप द्विजश्रेष्ठ भूदेव पंक्तिपावन पद्मरूप नमस्तेस्तु
पात्ररूप नमोस्तु ते आचमनीयं ॥ वस्त्रं यज्ञोपवीतं गंधालंकार कुंकुमानि पु सहस्रा
ष्पाण्यपि प्रदेयानि तत्तन्मंत्रेण चार्पयेत् ॥ यद्वार्चनं कृतं विप्र तवा विष्णुस्वरूपि
णे तत्सर्वं निमदीनस्य विश्वनेऽस्तु समर्पणं इति संप्रार्थ्य ॐ अद्येत्यादि संक
ल्प मम समस्तपापक्षयार्थं श्रीपरमेश्वरप्रीत्यर्थं गोपूजां करिष्ये गोभ्यो यज्ञाः प्रव
र्तंते गोभ्यो देवाः समुत्थिताः गोभिर्वेदाः समुत्कीर्णाः षडंगं च पदक्रमात् ततो गवा
मंगेषु देवानामावाहयेत् शृंगमूले ब्रह्मविष्णू आवाहयामि शृंगमध्ये महादेवं आ
वाहयामि शृंगाग्रे सर्वाणि तीर्थानि आवा० शिरोमध्ये गौरीं आवा० ललाटे भवानीं
आ० नासापुटे षण्मुखं आ० नासाग्रे कंबलाश्वतरौ आ० कर्णयोरश्विनौ देवौ आ०
चक्षुषोः सूर्याचंद्रमसौ आ० दंतेषु वायुं आवा० जिह्वायां वरुणं आ० हुंकारे सर
स्वतीं आ० गंडयोः पक्षमासान् आ० वचासि अक्षोहण्णं आ० ओष्ठयोः संध्याद्वयं आ० ग्री
र वा:

गौ दा वायां श्रीहृद्रं आ० कंठे स्वयंभुवं आ० कुक्षौ स्कंदासि आ० उरसि साध्यान् आ०
२ प देवुष्वमं आ० खुरमध्ये अप्सरसः आ० पृष्ठे एकादश रुद्रान् आ० सर्वसंधि
षु अष्टवसून् आ० श्रोण्योः पितॄन् आ० गोमूत्रे यमुनां आ० क्षीरे नंदिनं आ० स
र्पिषु क्रतुशतं आ० रोमसु सर्वान् देवान् आ० उदरे उदधिं आ० स्तनेषु सप्तसाग
रान् दृष्टि नर्मदां आ० सौरभेयि सर्वहिते पवित्रे पापनाशिनि प्रतिगृह्ण मया द
त्तं पाद्यं सुरवंदिते गवे नमः इदं तं पाद्यं ॥ सर्वदेवमये देवि सर्वतीर्थमये शुभे गृ
हाणार्घ्यं मया दत्तं सौरभेयि नमोस्तु ते अर्घ्यं० देहस्थिते च रुद्राण्याः शंकरस्य
सदा प्रिये धेनुरूपेण सा देवी मम पापं व्यपोहतु आ० चमनीयं या लक्ष्मीः सर्व
लोकेषु या च देवेषु संस्थिता धेनुरूपेण सा देवी मम पापं व्यपोहतु स्नानं ~~व~~
हीमतेन मया सम्यक्सुधुष्पमाल्यादनं शुभं रुद्राभिर्वस्त्रदानेन प्रीयतां परमे
श्वरी वस्त्रं० सर्वलोकप्रियं देवि चंदनं गंधसंन्निभं कस्तूरिकुंकुमाढ्यं च चं २
दनं प्रतिगृह्यतां सेचंदनं समर्पयामि सौभाग्यद्रव्यं० गवामंगेषु तिष्ठंति

भुवनानि चतुर्दश यस्मात्तस्मात् शिवं मे स्यादिह लोके परत्र च पुष्पं सः तुलसीमि
श्रितां माल्यां नानापुष्पसमन्वितां गृहाण सौरभेयि त्वं देवि मातर्नमोस्तु ते इति माल्यां०
गौरीर्मिमाय० हिं कृण्वती० आयं गौः पृश्नि० इति तिसृभिः ऋग्भिः संप्रार्थ्य गवे अलंका
रान् दद्यात् ॐ गवाभूषणार्थं स्वर्णं रजतं च रत्नभूषणार्थं० छत्रभूषणार्थं मात्रद्रव्यं०
नेत्रभूषणार्थं रत्नद्रव्यं कंठभूषणार्थं घंटाचामरं यज्ञोपवीतं० सर्वाभरणभूषणार्थं
मुक्तानि पञ्चवर्णकं पुच्छभूषणार्थं च मुक्तान्येव ~~समर्पि~~ ॥ देवद्रुमरसोद्भूतं गोघृ समर्पि
तेन समन्वितं प्रयच्छामि महादेवि धूपोयं धूपं० साक्षित्वं सर्वलोके देवानां च स गो
दा प्रिये गोस्त्वं पाहि जगन्नाथे दीपं प्रतिगृह्यतां दीपं ॥ सौरभेयाः शुभाः श्रे
ष्ठाः पवित्राः पुण्यराशयः प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातरः नैवेद्यं०
इदं फलं० पूगीफलं० हिरण्य० पंचगावः समुत्पन्ना मथ्यमाने महार्णवे प्रभा.
सकंमयानंदा तस्यै देव्यै नमो नमः नमस्कारः गावो मे अग्रतः संतु गावो मे ~~पृष्ठ~~ स
तु पृष्ठतः गावो मे हृदये संतु गवां मध्ये वसाम्यहं धेनुस्त्वं पृथिवी सर्वा च

गो॰दा॰ स्मात्केशवसंनिभा सर्वपापहरा नित्यमतः शांतिं प्रयच्छ मे देहस्था या च रुद्राण्याशं
करस्य सदाप्रिया धेनुरूपेण सा देवी मम पापं व्यपोहतु प्रार्थना घृतवेष्टितेकां
२ स्यपात्रे ब्राह्मणहस्ते गोपुच्छं दत्वा साक्षतमुदकं धारां पातयेत् स्वस्ति
स्तु गौस्तारयतु पुण्यं वर्धतां दीर्घमायुः श्रेयः शांतिः पुष्टिस्तुष्टिश्चास्तु आरो
ग्यमस्तु शिवं कर्मास्तु कर्मसमृद्धिरस्तु पुण्याहं भवंतो ब्रुवंतु स्वस्ति भवंतो ब्रु
वंतु ऋद्धिं भवंतो ब्रुवंतु श्रीरस्त्विति भवंतो ब्रुवंतु ततो दाता प्रवरोच्चारणं कृ
त्वा ततो ब्राह्मणस्य अमुकगोत्रोत्पन्नायामुकशाखाध्यायिने अमुकशर्मणे
ब्राह्मणायइमां गां रुद्रदैवत्यां सवत्सां सर्वालंकारभूषितां दोहनपात्रसहि
तां मम कृतसंकल्पसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं तुभ्यमहं संप्रददे न मम दे
वस्य॰ प्रतिगृह्यतां प्रतिगृह्णामि कइदं॰ एवं त्रिवारं कृत्वा कृतस्य गोदान
स्यांगतासिद्ध्यर्थं गोप्रतिग्रहीत्रे ब्राह्मणायइमां दक्षिणां तुभ्यमहं संप्रददे न ३
मम ततो ब्राह्मणः ॐ स्वस्ति ततो विप्रं प्रार्थयेत् त्वं सर्वदेवगणानां मंदिर सर्वपि

तविश्वेश्वरत्रिपथगोदधिपर्वतानां तद्दानशांतिकवलीकृतपापकोटिप्रं
प्रोस्मिनिर्वृतिमतीं वपरां नमामि अथ गोपुच्छोदकतर्पणं अद्य पूर्वोक्त॰ गोदा
नांगभूतं देवऋषिपितृदेवताप्रीत्यर्थं गोपुच्छोदकतर्पणं करिष्ये ब्रह्मातृप्य
तु विष्णुस्तृप्यतु रुद्रास्तृ· शक्राद्या देवतास्तृ· ऋषयस्तृ· मानवास्तृ· विश्वे
देवास्तृ· दिक्पालास्तृ· मरुतस्तृ· वसवस्तृ· दितिपुत्रास्तृ· साध्यास्तृ· मरुद्ग
णास्तृ· ग्रहास्तृ· नक्षत्राणितृ· योगास्तृ· राशयस्तृ· वसुधास्तृ· अश्विनौतृप्ये
तां यक्षास्तृप्यंतु रक्षांसितृप्यं· मातरस्तृ· गायत्री तृप्यतु श्रीस्तृ· रुद्राणी
तृप्यंतु वेदास्तृप्यंतु पुराणानितृप्यं· आचार्यास्तृ· ऋत्विजस्तृ· श्रोत्रियास्तृ·
अप्सरसस्तृप्यं· नागास्तृप्यंतु सरितस्तृप्यंतु कुमारस्तृप्यंतु तीर्थानितृ
प्यंतु जलदास्तृ· मनुष्यास्तृप्यंतु पितरस्तृ· पन्नगास्तृ· नागपत्न्यस्तृ· दिव्य
दैत्यास्तृ· वीरुद्योगिन्यस्तृ· विद्याधरास्तृ· औषधयस्तृ· दिग्गजास्तृ
प्यंतु देवपत्न्यस्तृप्यंतु लोकपालास्तृप्यंतु सप्तर्षयस्तृ· नारदस्तृप्यतु

855

जंतवस्तृप्यंतु स्थावराणित· जंगमास्त· पृथ्वीवीमी सनकस्तृप्यंतु· सनंद
नस्तृप्य· सनातनस्त· अस्करास्त· अपसव्यं कव्यवाहंतर्पयामि आज्यपांस्त·
अग्निष्वात्तांस्त· सोमपांस्त· बर्हिषदांस्त· पितृंस्तर्पयामि यमंश्च तर्पयामि· धर्म
राजंत· मृत्युंत· अंतकंत· वैवस्वतंत· कालंत· सर्वभूतक्षयं· औदुंबरं· दध्नं· नीलं·
परमेष्ठिनं· वृकोदरं· चित्रं· चित्रगुप्तं· आब्रह्मस्तंबपर्यंतंजगत्ग्रामचतुर्विधं त
त्सर्वंतृप्तिमायांतुगोकुक्षोदकतर्पणैः प्रमादात्· यत्स्यस्थत्या· अनेनगोग्र
दानाख्येनकर्मणा तेनश्रीपरमेश्वरः प्रीयतांनमम कृतस्यगोदानसां
गतासिध्यर्थंयथाशक्तिब्राह्मणान्भोजयिष्ये भूयसींदानमहंकुर्वे· ते
तेनश्रीपरमेश्वरः प्रीयतांनमम इतिगोदानविधिः